CENTRAL LIBRARY

# Examination held by the Sreegopal Basu-Mallik Fellow.

## 1908.

---

*Examiner*—PANDEYA RAMAVATARA SARMA SAHITYA-CHARYYA, M.A.

### PAPER I.

### GITA I.

१. विरक्तायार्जुनाय कृष्णेन युद्धोपदेशः कथं नानुचितः ।

२. साङ्ख्ययोगयोरैक्यं भगवता कथं प्रतिपादितम् ।

३. स्थितप्रज्ञस्य लक्षणमाचरणादिकं च कीदृशम् ।

४. आत्मनो नित्यत्वं क्षणिकत्वं वा भगवतोऽभिमतमिति सयुक्तिक प्रतिपादय ।

### PAPER II.

### GITA II.

१. 'भोक्तारं यज्ञतपसां' 'न कर्त्तृत्वं न कर्माणीति' वाक्ययोर्विरोध परिहरणीयः ।

२. सुहृदं सर्वभूताना मित्युक्तेः सृष्टिवैषम्येण प्रत्यक्षगोचरेण कथं न विरोधः ।

३. 'जहि शत्रुं महाबाहो' इत्यादौ कः शत्रुरभिमतः, कथं तस्योद्भवः किं च तस्य कार्यम् ।

४. कर्मणो मोक्षहेतुत्वमस्ति न वा । अस्ति चेत् कीदृशस्य ।

---

CENTRAL LIBRARY



## PAPER III.

### CHHANDOGYA UPANISHAD.

१. सदेवेत्यादिवाक्ये सच्छब्दस्य कोऽर्थः। एव, एकम्, अद्वितीयम् इति निर्द्धारणवाचिपदत्रयमत्र कथं दत्तम्।

२. 'तत्त्वमसि'-वाक्ये तत्पदस्य 'त्वम्-'पदस्य च कोऽर्थः, कथं चानयोः सामानाधिकरण्यम्।

३. इन्द्राय प्रजापतिना कस्यात्मन उपदेशः कृतः। प्रतिपर्य्यायमस्मिन् प्रकरणे एक एवात्मोपदिष्टः अनेके वात्मानः।

४. भूमशब्दस्य कोऽर्थः। यः सत्येनातिवदतीत्यस्य यो वै भूमेत्यादिन कः संबन्धः।

---

## PAPER IV.

### VEDANTA SUTRAS.

१. ब्रह्मजिज्ञासायाः कर्म्मजिज्ञासया सह कः सम्बन्धः।

२. अध्यासग्रन्थस्य किं प्रयोजनं किं चाध्यासस्य स्वरूपम्।

३. ब्रह्मप्रतिपादकवाक्याना मुपासनाविधिशेषत्वं कथं निराकृतम्।

४. शास्त्रयोनित्वादिति सूत्रस्यार्थद्वयं विशदीकृत्य लेखनीयम्।